Department of Education, Mysore

SANSKRIT TEXT

FOR

THE MYSORE LOWER SECONDARY EXAMINATION OF 1926

VIKRAMÁRKACHARITRAM

(STORIES 28—32)

AND

SIX STORIES FROM

PANCHATANTRAM

MYSORE
PRINTED AT THE GOVERNMENT BRANCH PRESS
1925

Price As. 3

Department of Public Instruction, Mysore

SANSKRIT TEXT

FOR

THE MYSORE LOWER SECONDARY EXAMINATION OF 1926

VIKRAMÁRKACHARITRAM

(STORIES 28—32)

AND

SIX STORIES FROM

PANCHATANTRAM

MYSORE
PRINTED AT THE GOVERNMENT BRANCH PRESS
1925

अशुद्धशोधनम्

पुटे.	पङ्क्तौ.	अशुद्धम्.	शुद्धम्.
1	19	माच्छाम	मागच्छाम
4	6	रान्य	राजन्य
,,	14	अह	अहं
,,	16	द त्कुन्दा	दलत्कुन्दा
6	23	जालीकः	जालिकः
11	18	शुकता	शुल्कता
16	16	एवं विध	एवंविध
23	4	शकरस्य	शकस्य
,,	9	स्वबुद्धचा	स्वबुद्ध्या
,,	10	अथसौ	अथासौ
23	17	परोधो	पराधो
,,	18	सत्वानां	सत्त्वानां
24	3	तमहूय	तमाहूय
,,	17	सिध्यति	साध्यते
30	23	कत्र	कुत्र
34	1	मृताना	मृतानां

विक्रमार्कमहाराजचरितम्.

अष्टाविंशोपाख्यानम्.

अत्र हि भेताळपुरे कश्चन चण्ड्या निवार्य बलिभावात् ।
तत्रापन्नुनोद नृणां तत्प्रथमं बलिविधानमिति वक्ति ॥

पुनरपि राजा कदाचन सिंहासनमधिरोढुकामः पाञ्चालिकामस्तके पादं निधातुमुपचक्रमे; तावदष्टाविंशतितमी प्रतिमा जगाद—यद्यपि भवान् महीं पालयति, तथाऽपि विक्रमार्क इव भद्रासनमिदमधिरोढुं नार्हति; श्रूयताम्—

विक्रमादित्यो राजा पृथिवीपर्यटनार्थमेकदा स्वनगरान्निर्गतो नगरमेकमगमत्. तन्नगरसमीपे निर्मलोदका काऽपि तरङ्गिणी प्रवहति. तत्तीरे नानाविधकुसुमफलभरितविटपिकुलसंकुलं वनमेकमपश्यत्. मध्ये च तस्य समुत्तुङ्गगोपुरावरणरमणीयं देवतायतनमद्राक्षीत्. दृष्ट्वा च तत्र नदीजलमवगाह्य तमालयमलंकुर्वाणं देवं प्रणम्य तत्रोपविवेश. तत्रान्तरे वैदेशिकाश्चत्वारः समागत्य राजसमीपे समुपविविशुः. ततोराजा तानप्राक्षीत्—"यूयं कुतः समागच्छथ?" तत्र कश्चिदुवाच—"पूर्वदेशादागच्छामः." राजा—"तत्र किमद्भुतमपश्यत?" । ते प्रोचुः—"स्वामिन् महदपूर्वं लोचनगोचरमकुर्म. यत् प्राणान् हस्ते गृहीत्वा वयमाच्छाम." राजा.—"तत् किं कथयत." पुरुषाः—"तत्र देशे भेताळपुरी नाम वर्तते. तत्र शोणितप्रिया नाम देवताऽस्ति.

तत्रत्या महाजना राजा च प्रतिसंवत्सरं स्वमनोरथपूरणार्थं तस्यै पुरुषोपहारं प्रयच्छन्ति. तस्मिन् दिने कोऽपि वैदेशिकः समायाति यदि, तमेव देवतायाः पुरः पशुमिव समर्पयन्ति. वयमपि तस्मिन्नेव दिने मार्गवशात् तन्नगरं प्राप्ताः. तत्रत्या अस्मानुपहर्तुमयतिषत. तां प्रवृत्तिं कर्णपरम्परया निशम्य वयं प्राणत्राणपरायणाः कथमपि पलायनमेव शरणं मन्वानाः समागताः स्म. एतन्महदाश्चर्यमस्माभिर्दृष्टम्." तच्छ्रुत्वा राजा विक्रमस्तत्र गत्वा देवतायतनमतिभयङ्करं विलोक्य देवतां नमस्कृत्यास्तावीत्—

ब्राह्मी वारिरुहेन्दुसौम्यवदना माहेश्वरी लीलया
कौमारी रिपुवर्गनाशनकरी चक्रायुधा वैष्णवी ।
वाराही घनघोरघुर्घुररवाऽप्यैन्द्री च वज्रायुधा
चामुण्डा गणनाथरुद्रसहिता रक्षन्तु मां मातरः ॥

इति स्तुत्वा तत्र रङ्गमण्टपमधिशिश्ये. तस्मिन् समये कश्चिद्दीनवदनो वैदेशिको महाजनैर्वाद्यपुरस्सरमनीयत. राजाऽपि तं दृष्ट्वा स्वमनसि विचारयतिस्म—अयमेव देवताबलिनिमित्तं महाजनैः समानीतः; ततो दीनवदनो दरीदृश्यते. अस्मिन् समये मम शरीरं दत्वाऽमुं मोचयिष्यामि. इदं शरीरं शतं वर्षाणि स्थित्वाऽपि सर्वथा नाशमेव यास्यति. अतः स्वदेहव्ययेनापि धर्मं कीर्तिं च समार्जयिष्यामि. उक्तं च—

चला लक्ष्मीश्चलाः प्राणाश्चलो देहोऽपि यौवनम् ।
चलं चलश्च संसारः कीर्तिर्धर्मश्च निश्चलौ ॥

अर्थाः पारदचञ्चला गिरिनदीवेगोपमं यौवनं
मानुष्यं जलवीचिबिन्दुचपलं फेनोपमं जीवितम् ।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गळोद्घाटनं
पश्चात्तापयुतो जरापरिगतश्शोकाग्निना दह्यते ॥

एवं विचार्य राजा तान् महाजनानपृच्छत्—"अयं दीनवदनः कुत्र किमर्थं नीयते?" जनाः—"अमुं देवताबलिनिमित्तं नयामः." राजा—"किं कारणम्"? जनाः—"देवताऽनेन पुरुषोपहारेण तुष्टा सत्यस्मन्मनोरथं पूरयिष्यति." राजा—"भो महाजनाः! अयमत्यन्तमल्पतनुः परं भीतश्च. अस्य शरीरोपहारेण देवतायाः का नाम तुष्टिर्भविष्यति? तस्मादमुं मुञ्चन्तु भवन्तः. अहमेव तदर्थं मम शरीरं दास्यामि. अहं पुष्टाङ्गोस्मि. मम मांसोपहारेण देवता संतुष्टा भविष्यति. अतो मां नयत." इति भणित्वा राजा तं विमोच्य स्वयमेव देवतायाः समक्षं गत्वा स्वखड्गं कण्ठे चकार. तावद्देवता मण्डलाग्रमाकृष्य जगाद—"भो महासत्त्व! तवौदार्येण धैर्येण च संतुष्टाऽस्मि; वरं वृणीष्व." राजा—"देवि! यदि मम प्रसन्नाऽसि, तर्ह्यद्यप्रभृति पुरुषमांसोपहारं परित्यज." देवताऽप्यङ्गीचकार. तत्र महाजनाः राजानमवदन्—"महीपाल! त्वं निजसुखनिरभिलाषः सन् परार्थमेव परं खेदं वहसि महाद्रुम इव तथा हि—

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते वृत्तिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया स्वाश्रितानाम्॥

ततो राजाऽपि तदनुज्ञां गृहीत्वा निजनगरमगमत्.

इमां कथां कथयित्वा सालभञ्जिका राजानमब्रवीत्—"धारानगरधुरंधर! त्वय्येवमौदार्यं विद्यते?" तच्छ्रुत्वा राजा तूष्णीं बभूव.

ऊनत्रिंशोपाख्यानम्.

एष हि विक्रमभूपः कस्मैचिद्वन्दिने दरिद्राय ।
रत्नानि यावदिष्टं हर्तुं कोशं ददाविति ब्रूते ॥

भूयोपि समागतं भोजराजमपरा व्याजहार. "नेदमधिष्ठातुमर्हति भवान्; श्रूयतां राजन्!—

एकदा विक्रमार्को राजा रा न्यकुमारैः संसेव्यमानः सभायामुपविवेश.—तदा कश्चन स्तुतिपाठकः समागत्य प्रणम्य—

यावद्वीचीतरङ्गान् वहति सुरनदी जाह्नवी पुण्यतोया
यावच्चाकाशमार्गे तपति दिनकरो भास्करो लोकपालः ।
यावद्वज्रेन्द्रनीलस्फटिकमणिमयं विद्यते मेरुशृङ्गं
तावत् पुत्रैस्सपौत्रैस्स्वजनपरिवृतो भुङ्क्ष्व राज्यं नृपाल!॥

यथा तोयं समाकाङ्क्षन् मयूरो ग्रीष्मपीडितः ।
निरीक्षतेऽथ जीमूतं तथाऽहं तव दर्शनम् ॥

अह तु हिमवन्निकटाद्भवतः कीर्तिं समाकर्ण्य दूरादागतोस्मि. इत्युक्त्वाऽस्तावीत्

कर्पूरादपि कैरवादपि द त्कुन्दादपि स्वर्णदी-
कल्लोलादपि कैतकादपि गलत्कान्ताद्दगन्तादपि ।
दूरोन्मुक्तकळङ्कशङ्करशिरश्शीतांशुखण्डादपि
श्वेताभिस्तव कीर्तिभिर्धवळिना सप्तार्णवा मेदिनी ॥

देव! देवतरुच्छायामाश्रितोऽस्मि महीपते!।
किं नाम खलु दैन्यं मे धन्यो नान्योऽस्ति मत् भुवि ॥

देव ! सर्वस्वदातारं भवन्तं पश्यतो मम ।
गाहते हृदयं भूपं तं वदान्यशिरोमणिम् ॥

राजा.—" कस्ते स्मरणवीथीमागतः ? " वन्दी.—देव ! अस्त्युत्तरस्यां दिशि हिमवत्पर्वतोत्तरदिग्भागे जम्बीरनगरे धनेश्वरो नाम राजा. स तावदर्थिनां दारिद्र्यदुःखं निवार्य तान् धनपतीन् करोति । एकदा तेन धनेश्वरेण माघशुद्धसप्तम्यां वसन्तपूजा विहिता ; तत्र दानार्थमष्टादशकोटिसुवर्णं परिकल्पितम्. एवमौदार्यगुणगरिष्ठः स राजा जागर्ति. अस्मिन् देशे देव एक एव तादृशो दृष्टः." तस्य वचनं श्रुत्वा राजा भाण्डारिकमाहूयावादीत्—" अमुं वन्दिनं भण्डारं नीत्वा महार्हाणि रत्नानि दर्शय. ततोऽयं यावन्ति वाञ्छति तावन्ति रत्नानि गृह्णातु." तथा कोशाध्यक्षस्तं भण्डारं नीत्वा दिव्यान्यनेकरत्नान्यदर्शयत्. स्तुतिपाठकोऽपि स्वेप्सितानि रत्नानि यथेष्टं गृहीत्वा परिपूर्णमनोरथो राजसमीपमागत्य भणतिस्म—" भो देव ! तव प्रसादादहं धनपतिर्जातोस्मि. नवापि निधयो मम हस्ते प्राप्ता इव. महाराज ! हिरण्यगर्भादयोऽपि भवत्तुलां नाधिरोहन्ति. तथा हि—

वेधा वेदमयो विष्णुर्गोविन्दोपि गदाधरः ।
शम्भु श्शूली विषादी च देवः केनोपमीयताम् ॥"

इति स्तुत्वा ब्रह्मायुर्भवेत्याशिषमभिधाय निजनिवासमयासीत्—"

इति कथां कथयित्वा सालभञ्जिका राजानमब्रवीत्—
" भो राजन् ! किमाकर्णितमौदार्यं विक्रमार्कस्य ? " राजा तूष्णीं बभूव.

त्रिंशोपाख्यानम्.

इन्द्रजालविदुषः प्रवीणतां भूमिजानिरवलोक्य विस्मितः।
पाण्ड्यभूपतिसमर्पितं धनं दत्तवानिति हि वक्ति सांप्रतम्॥

अथ भूयोपि भद्रासनमधिरोढुमभिलषन्तमन्या सालभञ्जिकाऽभणत्—"महीपाल! विक्रमस्यौदार्यं त्वयि किं विद्यते?" राजा.—"भोः सालभञ्जिके! कीदृशं तत्?" साऽब्रवीत् राजन्! श्रूयताम्—

एकदा विक्रमः सकलसामन्तराजकुमारैरुपसेव्यमानः सिंहासनमध्यास्त. तत्र कश्चिदैन्द्रजालिकः समागत्य राजानं नमस्कृत्य जगाद—"देव! सकलकलाभिज्ञस्य तव समीपमागत्य बहव ऐन्द्रजालिका निजलाघवमदर्शयन् किल. मम तावदिदमेकं लाघवं तत्र भवान् प्रसन्नेन चेतसा विलोकयतु." राजा.—"नेदानीमवसरोऽस्माकम्. स्नानसमयः संप्राप्तः, श्वः प्रभाते द्रक्ष्यामः." अथ परेद्युः प्रभाते राजा विक्रमस्तत्कालोचितं सर्वमनुष्ठानजातं विधाय प्रियबान्धवैः सह शरीरवृत्तिं निर्वर्त्य वस्त्राभरणगन्धमाल्याद्यैरलङ्कृतः सकलसामन्तमहीकान्तहितपुरोहितसेवितः सुधर्माभिधानं सभाभवनमवगाह्य तादृशममरपरिबृढप्रसादसमासादितमासनमास्थाय तमैन्द्रजालिकमाह्वाययत्. ऐन्द्रजालिको महाकायो महाश्मश्रुभिर्दैदीप्यमानवदनो दक्षिणहस्ते खड्गं धृत्वा, अतिमनोहररूपलावण्यप्रेक्षणीयां कामपि कमललोचनां परिगृह्य, राजास्थानमण्टपं प्रविश्य, राजानं प्रणम्य तस्थौ. तदा सर्वेऽपि सामाजिकाः सविस्मयमद्राक्षुः, अप्राक्षुश्च—"को भवान्? कुतस्त्यः?" इति. ऐन्द्रजालीकः.—"अहं महेन्द्रसेवकः, कदाचित् स्वामिना शप्तो भूमण्डले तिष्ठामि. इयं मम प्रेयसी. अद्य स्वर्गे

देवानां पूर्वदेवानां च महद्युद्धं प्रवर्तते. अहं तत्र गच्छामि. अयं तु राजा विक्रमादित्यः परनारीसहोदर इत्यश्रौषम्. अतोऽहमस्य सविधे प्रियामिमां निक्षिप्य युद्धार्थं गमिष्यामि." तच्छ्रुत्वा राजा विक्रमादित्यः परमाद्भुतभरितहृदयः कथमप्युररीकृतवान्. सोपि विक्रमहस्ते प्रणयिनीं समर्प्य तं प्रणम्य झडिति गगनमुदपतत्. तावदाकाशे, 'रे रे मारय घातय' इति घोरतरा वागभूत्. अथ सर्वेऽपि सभ्या युगपदुन्नमितवदनाः सकौतुकमपश्यन्. तदनन्तरं मुहूर्तमात्रे राजसमक्षं दृढमुष्टिनिपीडितकृपाणो रुधिरधारारूषितो बाहुरेको दिवः पपात. ततो राजा विलोक्य सभ्यानवादीत्—"महानयं वीरः संग्रामे प्रतिभटैर्न्यपाति. तस्यैकः सखड्गो बाहुरत्र पतितः" एवं वदत्येव राजनि कबन्धो न्यपतत्. समनन्तरमेव शिरोऽपि पतदृश्यत. तद्दृष्ट्वा सा वनिता सकरुणं जगाद—"भो देव! मम भर्ता रणाङ्गणे युद्धं विधाय शत्रुभिर्निहतः. तस्येदं शरीरं सखड्गो बाहुः शिरश्च. मम प्राणप्रियं यावदमर्यो न वृणते, तावदहं गमिष्यामि. ममाग्निर्दीयताम्." एवं तस्या वचनं श्रुत्वा राजाऽब्रवीत्—"अयि पुत्रि! किमर्थमग्निं प्रवेक्ष्यासि? त्वामहं तनयामिव परिपालयामि रक्षात्मशरीरम्." वनिता.—"देव! किमभिदीयते? यदर्थमेतच्छरीरं, स मे स्वामी दशामिमामनुभवति. देव! तदेतच्छरीरं कस्य कृते रक्षामि. देवोऽप्येवं मावादीत्. यतः 'प्रमदाः पतिवर्त्मगाः' इति स्वतः सिद्धोऽयं पन्थाः. तथा हि—

शशिना सह याति कौमुदी सह मेघेन तडित् प्रलीयते।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि॥

तथा च स्मृतिः—

मृते भर्तरि या नारी समारोहेद्धुताशनम्।
साऽरुन्धतीसमा भूत्वा स्वर्गलोके महीयते॥

यावच्चाग्नौ मृते पत्यौ भार्याऽऽत्मानं प्रदाहयेत् ।
तावन्मुञ्चति नो देहं स्त्री गरिष्ठा कथञ्चन ॥
मातृकं पैतृकं चैव यत्र चैव प्रदीयते ।
कुलत्रयं पुनात्येषा भर्तारं याऽनुगच्छति ॥
तिस्रः कोट्योऽर्धकोटी च यानि रोमाणि मानवे ।
तावत्कालं वसेत् स्वर्गे भर्तारं याऽनुगच्छति ॥
व्याळग्राही यथा व्याळं बिलादुद्धरते बलात् ।
तथा स्त्री पतिमुद्धृत्य सह तेनैव मोदते ॥
दुर्वृत्तं वा सुवृत्तं वा सर्वपापरतं तथा ।
भर्तारं तारयत्येषा भार्या धर्मे सुनिष्ठिता ॥

राजन्! पतिहीनाया जीवितेन किं प्रयोजनम्? उक्तं च—

अपि बन्धुशतैर्नारी बहुपुत्रगणैर्युता ।
शोच्या भवति सा नारी पतिहीना तपस्विनी ॥
नातन्त्री वाद्यते वीणा नाचक्रो याति वै रथः ।
नापतिस्सुखमाप्नोति नारी बन्धुशतैरपि ॥
मितं ददाति हि पिता मितं माता मितं सुतः ।
अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥
दरिद्रो व्यसनी वृद्धो व्याधितो विकलस्तथा ।
पतितः कृपणो वाऽपि स्त्रीणां भर्ता परा गतिः ॥
नास्ति भर्तृसमो बन्धुर्नास्ति भर्तृसमः सुहृत् ।
नास्ति भर्तृसमो नाथो नास्ति भर्तृसमः प्रियः ॥
वैधव्यसदृशं दुःखं स्त्रीणामन्यन्न विद्यते ।
धन्या सा योषितां मध्ये म्रियते भर्तुरग्रतः ॥

इत्येवमुक्त्वा सा हुताशनदानाय राज्ञः पादयोर्न्यपतत्. राजाऽपि तस्याः पतिभक्तिपवित्रं वचनं श्रवणसात्कृत्वा करुणारसार्द्रान्तः-

करणः श्रीखण्डादिभिश्चितां विरचय्य तामन्वज्ञासीत्. साऽपि राज्ञः सकाशादनुज्ञां प्राप्य भर्तृशरीरेण सह पावकं प्राविक्षत्. ततः सूर्योऽपि संकुचितकरसहस्रश्चरमगिरिशिखरगह्वरमवागाहत. अथ राजाऽपि सायन्तनं कर्मजातं निर्वर्त्य क्रमेण निशामनैषीत्. अथ प्रभातायां त्रियामायामुदयमहीधरशेखरायिततनौ तिग्मभानौ राजा सिंहासनोपविष्टः सकलसामन्तसंहतिप्रणतीर्यावदङ्गीकुर्वन्नास्त, तावत् स वीरो यथापूर्वं खड्गहस्तो देदीप्यमानविग्रहो नभस्तलादवतीर्य राज्ञः कण्ठे सुरतरुकुसुमनिर्मितां परिमळलुब्धमधुकरनिकुरुम्बनिरन्तरामम्लानां दिव्यमालां समर्प्य महेन्द्रसंदेशं तस्मै निवेद्य नानाविधप्रथनानुबद्धाः कथाः कथयितुमुपाक्रंस्त. ततः सर्वाऽपि सभा विस्मिता जाता. तदा वीरोऽवदत्—"अहमितो निर्गत्य स्वर्गं गतोऽस्मि किल. तत्र देवानां दैत्यानां च महान् संग्रामः प्रवृत्तः. तत्र च मया बहवो दानवा निपातिताः. केचन कान्दिशीका आसन्. एवं संग्रामे सकाम एव संवृत्ते, देवः सहस्रलोचनः सप्रसादं मामवलोक्यावदत्—'अये वीर! चिराद्दृष्टोऽसि. एतावन्तं कालं कुत्र स्थितोऽसि?' ततोऽवादिषम्—'स्वामिनः शापादेव तावन्ति दिनानि भूलोके स्थितोऽस्मि. अद्य स्वामिनो दैत्यैः सह युद्धं प्राप्तमाकर्ण्य सहायार्थमागतोऽस्मि.' तदा परं प्रसन्नचित्तो महेन्द्रः—'अये वीर! इदम्प्रथमं मध्यमलोकं मा गच्छतात्. संप्रति तवाहं प्रसन्नोऽस्मि. गृहाण कनकवलयम्' इति स्वकरान्मणिकङ्कणमुन्मुच्य मम हस्ते स्वयमेवाचकलत्. पुनरहं व्यजिज्ञपम्—"भोः स्वामिन्! अहमत्रागच्छन् विक्रमार्के भार्यां निक्षिप्यागतोऽस्मि. तां गृहीत्वा झडिति समागमिष्यामि देवपादमूलम्" इति समागतोऽस्मि. तत् क्व मे प्रेयसी? प्रेष्यताम्." राजा

तद्वचनं श्रुत्वा विस्मयं गत्वा तूष्णीमभूत्. ऐन्द्रजालिकः— "राजन्! किमिति जोषमास्यते?" तदा सभ्यः कश्चिदाह— "तव भार्याऽग्निं प्रविष्टा." ऐन्द्रजालिकः.—"हन्त! किमेतत्!" सर्वे परस्परवदनानि विलोकयन्तो निरुत्तरीभूतास्तूष्णीमासन्. तदैन्द्रजालिकः.—"भो राजावतंस! परदारसहोदरः सकलार्थिलोककल्पतरुश्चेति महतीं कीर्तिमासाद्य मम प्राणप्रियामन्तःपुरे संगोप्य किमर्थं तूष्णीं स्थितोऽसि? किमेतदपचरितम्?" इत्युक्तवति तस्मिन्, राजा संकुचितमनाः शुद्धान्तचरान् सौविदल्लानहूयावादीत्—"सौविदल्लाः! सत्यं ब्रूत. किमस्य दयिताऽन्तर्वर्तते?" सौविदल्लाः—"स्वामिन्नस्मज्जनन्या देव्या सल्लपन्ती सुखमास्ते." राजा.—"तर्ह्यत्रानयत." ततस्ते महाप्रसाद इति सत्वरमन्तःपुरं प्रविश्य तामनैषुः. राजा तां दृष्ट्वा सामाजिकैः सह महान्तं विस्मयमवाप्नोत्. अत्रान्तरे स वीरः स्थित्वाऽस्तावीत्. "जय महाराज! सकलमहीपालमकुटकोटिमणिकिरणपाटलितपादपीठ, जय निरर्गळदानोदकधारापूरप्लवमाननिखिलमार्गण, विक्रम, वसुन्धराधुरन्धर, अहमैन्द्रजालिकः मयैतादिन्द्रजालविद्यालाघवं दर्शितम्." राजा परमाश्चर्यतरङ्गितान्तरङ्गोऽभूत्. तस्मिन् समये भाण्डारिक आगत्याभाणीत्— "भोः स्वामिन्! पाण्ड्यराजेन स्वामिने करः प्रेषितः." राजा.— "किं प्रेषितम्?" भाण्डारिकः.—"देव!

अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुलाः
पञ्चाशन्मदगन्धलुब्धमधुपा धौरन्धराः सिन्धुराः।
अश्वानां त्रिशतं चतुर्दश रथाः पण्याङ्गनानां शतं
ह्येतद्विक्रमभूमिपाल! भवतस्तत्पाण्ड्यराट्प्रेषितम्॥"

ततो राजा सर्वमैन्द्रजालिकाय दीयतामित्यादिक्षत्. तदा तेन तत्सर्वं तस्मै दत्तम्.

इमां कथां कथयित्वा सालभञ्जिका भोजराजमब्रवीत्—"भो! राजन्नीदृशमौदार्यं विद्यते चेदुपविश." तच्छ्रुत्वा भोजराजो व्रीडितस्तूष्णीं गृहं गतः.

एकत्रिंशोपाख्यानम्.

अत्रायं मतिकौशलाद्विलसतो भेताळतः स्वां मृतिं
दूरेऽपोह्य ततश्च हन्तुमनसं संहृत्य दिग्वाससम् ।
भेताळं स्ववशंवदं च कलयन्नष्टौ च सिद्धीः पराः
प्राप्योद्दामयशाः शशास वसुधामित्येवमाभाषते ॥

पुनरप्येकदा राजा सिंहासनमारोढुमाजगाम; तावदन्या पाञ्चालिका जगाद—"भो महीवल्लभ! "विक्रमार्कसदृशमेव वहेरिति" महेन्द्रेण दत्तादेशमिदमासनम्. तदीया मङ्गळगुणास्त्वय्यपि यदि, काममुपविश." राजा.—"भोः सालभञ्जिके! कथय तस्य भव्यगुणान्." प्रतिमा.—राजन्! श्रूयताम्.—

विक्रमार्के राज्यं कुर्वत्येकदा कश्चिद्दिगम्बर आगत्य—

श्रीशो ददातु भगवान् भक्तानां वः समीहितम् ।
यद्भक्तिः शुकतामेति मुक्तिकन्याकरग्रहे ॥

यच्चापगा श्रीः सदनं सुराणां यन्मन्दुरा पद्मभुवो मुखानि ।
यत्तूणमम्भोधरपानभूमिर्देवः स भूयाद्भवतां शिवाय ॥

एकं ध्याननिमीलनामुकुळितं चक्षुर्द्वितीयं पुनः
पार्वत्या वदनाम्बुजे मदलसद्भृङ्गायितं यस्य वै ।

अन्यद्दूरविकृष्टचापमदने क्रोधानलोद्दीपितं
शम्भोर्मङ्गळदं समाधिसमये नेत्रत्रयं पातु वः ॥

इत्याशिषमुक्त्वा राज्ञो हस्ते फलमेकमदात्. अथ राजनिर्दिष्टमासनमध्यासीनो वाचमेवमुदश्चयामास—"राजन्नहं मार्गशीर्षचतुर्दशीदिवसे श्मशाने हवनं करिष्यामि. भवान् हि परोपकारी, महासत्त्वाधिकश्च ; तद्भवतु मामकहवनसहकारी." राजा.—"मया किं कर्तव्यम्?" दिगम्बरः—"महाश्मशानस्यानतिदूरे शमीपादपमूले कश्चिद्भेताळो वरीवर्तते. स त्वया मौनेन समानेतव्यः." राजा ओमित्युररीचकार. क्षपणकः कृष्णचतुर्दश्यां होमद्रव्याणि संगृह्य महाश्मशानवाटमगाहत. राजाऽपि कृपाणपाणिर्महाश्मशानं विवेश. तत्र च दिगम्बरो भेताळपरिग्रहार्थं शमीमहीरुहमदर्शयत्. तेन च मार्गेण भूरुहं तं प्राप्य भेताळं स्कन्धे गृहीत्वा श्मशानमार्गे समागच्छति भूपाले भेताळो जगाद—"भो राजन्! मार्गश्रमापनयाय काऽपि कथा कथ्यताम्." राजा मौनभङ्गभयात् तूष्णीं जगाम. पुनर्भेताळः.—"कथां न कथयसि. मौनभङ्गभयान्न जल्पसि. तर्ह्यहं कथयामि. कथावसाने मम प्रश्नोत्तरं ज्ञात्वाऽपि मौनभङ्गभयान्न कथयिष्यसि चेत्, तव शिरः सहस्रधा फलिष्यति" इति भणित्वा कथां कथयितुमारेभे.

"भो राजन्! श्रूयताम्—दक्षिणेन हिमवन्तं विन्ध्यवती नाम नगरी. तत्र सुविचारो नाम राजाऽवसत्. तस्य पुत्रो जयत्सेनः. स एकदाऽऽखेटनाय महदरण्यमवगाह्य तत्र करिणमेकं दृष्ट्वा तमनुधावन् सुदूरमतिपपात. अथ कथञ्चिन्नगरमार्गमुपलक्ष्य मन्दंमन्दमेकाकी समागच्छन् मध्ये कामपि तरङ्गिणीमद्राक्षीत्. तत्र तीरे कश्चिद्ब्राह्मणोऽनुतिष्ठन्नतिष्ठत्. राजपुत्रस्तत्समीपं गत्वा अवदत्—"भो ब्राह्मण! यावदहं जलं पिबामि, तावदमुमश्वं गृहाण."

ब्राह्मणः—“किं तव प्रेष्योऽहमश्वं ग्रहीतुम्?” ततस्तेन कशया ताडितो ब्राह्मणो रुदन् राजसमीपमागत्य सर्वं वृत्तान्तं निवेदयामास. स राजाऽपि तच्छ्रुत्वा रोषारुणलोचनः पुत्रं स्वदेशान्निर्वासयितुमियेष. तस्मिन्नवसरे सचिवः प्राह—“देव! राज्यभारोद्वहनयोग्यं कुमारं किमिति देशान्निर्वासयसि? नैतदुचितं मन्ये.” तदा राजा—“सखे! समुचितमेवेदमस्य मन्ये, यद्ब्राह्मणं कशया जघान. बुद्धिमता पुरुषेण ब्राह्मणद्वेषो न कार्यः उक्तं च—

न विषं भक्षयेत् प्राज्ञो न क्रीडेत् पन्नगैः सह।
न निन्देद्योगिवृन्दं च ब्रह्मद्वेषं न कारयेत्॥

भो मन्त्रिन्! किं त्वया न श्रुतानि पुराणानि?

अत्युन्नतपदं प्राप्तः पूज्यं नैवावमानयेत्।
नहुषः शक्रतां प्राप्तश्च्युतोऽगस्त्यावमानतः॥

अतो ब्राह्मणाः सर्वेऽपि पूजनीया एव उक्तं च—

द्विजाश्च नावमन्तव्यास्त्रैलोक्येश्वरपूजिताः।
देववत् पूजनीयास्ते दानमानार्चनादिभिः॥
यैः कृतः सर्वभक्षोऽग्निरपेयः स महोदधिः।
क्षयी च स कृतश्चन्द्रः कोऽनष्टो विप्रकोपनात्॥
यतः सोमं सदाऽश्नन्ति हव्यानि त्रिदिवौकसः।
कव्यानि चैव पितरः किं भूतमधिकं ततः?॥

तथाच—ये पूजिताः सुराः सर्वे मनुष्याश्चैव भारत।
तपोव्रतधना ये च कस्तान् जगति नार्चयेत्?॥
पूर्वं पीतः समुद्रो यैर्विन्ध्यो यैर्विनिपातितः।
यैश्चापि देवताः पुष्टाः किं भूतमधिकं ततः?॥
य एवं देवमन्विच्छेदाराधयितुमव्ययम्।
सर्वोपायैः प्रयत्नेन संतोषयतु स द्विजान्॥

तथा च—द्वारवत्यां भगवता कृष्णेनाप्युक्तम्—

घ्नन्तं शपन्तं परुषं वदन्तं यो ब्राह्मणं नार्चयते तथा माम् ।
स पापकृद्ब्रह्मदवाग्निमध्ये वध्यश्च दण्ड्यश्च न चास्मदीयः ॥

किंच—यश्च मां परया भक्त्या ह्याराधयितुमिच्छति ।
तेन पूज्या द्विजाः सम्यगेवं तुष्टो भवाम्यहम् ॥"

इत्युक्त्वा पुनः "अनेन दुरात्मना येन हस्तेन ब्राह्मणस्ताडित तस्य छेद एव प्रतीकारः" इति करच्छेदं निर्णिनाय. तावदेव ब्राह्मणः समागत्य तं राजानमभाणीत् "भो राजन्! सुतो बालिशस्तथा कृतवान्. अद्य प्रभृतीदृशमनुचितं न कुर्यात्. आद्योऽयमपराधो मर्षणीयः. अहं पुनर्मर्षयाम्येनम्" इति. तस्य वचनं श्रुत्वा राजा स्वपुत्रं विससर्ज. ब्राह्मणोऽपि यथागतमगात्.

इति कथां कथयित्वा भेताळः प्राह—"यदि जानासि ब्रूहि, अनयोः ब्राह्मणभूपालयोः गुणाधिकः कः?" राजा.—"भूपाल एव गुणाधिकः." तच्छ्रुत्वा मौनभङ्गो जात इति भेताळः शमीतरुमाजगाम. राजाऽपि पुनस्तत्र गत्वा तं स्कन्धे समारोप्य यावदाजगाम, तावत् पुनरपि कथां कथयतिस्म. एवंविधाः कथाः पञ्चविंशतिं कथयामास. ततो भेताळो विक्रमस्य बुद्धिकौशलं कथाग्रहणवैदग्ध्यं कृपारसौदार्यादिमांश्च गुणान् निरीक्ष्य तस्मिन् प्रसन्नो भूत्वा विक्रममवादीत्—"भो राजन्नयं दिगम्बरस्त्वां हन्तुं प्रयतते." राजा.—"कथमिव?" भेताळः.—"यदा त्वं मां तत्र नेष्यसि, तदा स एवं त्वां वादिष्यति—'भो राजन्! त्वमतिश्रान्तोऽसि. इदानीमिदमग्निकुण्डं प्रदक्षिणीकृत्य दण्डवत् प्रणम्य निजस्थानं गच्छ.' इत्युक्तस्त्वं प्रणामं कर्तुं नम्रो भविष्यसि तदा दिगम्बरः खड्गेन भवन्तं प्रहृत्य

तावकेन मांसेन होमं कृत्वा पूर्णाहुतिं विधाय तत्र होमे ब्रह्माणं मांकृत्वा सर्वमेवेदं कर्म ब्रह्मार्पणं करिष्यति· एवं कृतेऽस्य दिगम्बरस्याणिमाद्या अष्टसिद्धयो भविष्यन्ति.'' विक्रमः --"सखे! किमहं करवाणि?" भेताळः—"त्वमेवं कुरु यदा स दिगम्बरस्त्वां नमस्कर्तुमादेक्ष्यति, तदा 'अहं सार्वभौमः, सर्वे राजानो मामेव प्रणमन्ति· मया प्राणामः कदाऽपि न कृतः. तदहं न जाने. त्वं प्रथमं प्रणाममनुष्ठाय दर्शय. अनन्तरमहं करिष्यामि' इति ब्रूहि. ततः स यदा प्रणामं कर्तुं नम्रो भविष्यति, तदा त्वं तस्य शिरश्छिन्धि. अहं तव ब्रह्मा भूत्वा हवनं पूरयिष्यामि. तवाष्टौ महासिद्धयो वशंवदा भविष्यन्ति." इत्युक्तो राजा तथैव कृतवान्. ततो भेताळः स्वयं निर्वर्त्य हवनं दिगम्बरस्य शिरः पूर्णाहुतिं कृत्वा सर्वं ब्रह्मार्पणं विधाय, अणिमादीरष्टमहासिद्धीः राजसात् कृत्वा जगाद—"भो विक्रमार्कमहीपाल! तवाहं प्रसन्नोऽस्मि वरं वृणीष्व." राजा.—"यदि मम प्रसन्नो जातोऽसि तर्हीमं दिगम्बरं समुद्धर. यदाऽहं त्वाम् स्मरिष्यामि, तदा त्वमागन्तुमर्हसि." स तथेति प्रतिज्ञाय दिगम्बरं समुद्धृत्य निजनिवेशं प्रविवेश. राजा विक्रमोऽपि तस्मै दिगम्बराय ता अष्टमहासिद्धीर्दत्वा स्वनगरं विवेश."

इति कथयन्त्यां सालभञ्जिकायां भोजराजः "सत्यमाह भवती, नाहं विक्रमार्कस्य शततमीं कलामर्हामि. मुधैवायमुद्यमो मया बहुवारमकारि." इति विरराम.

द्वात्रिंशोपाख्यानम्.

श्रीधारापुरधूर्वहे गुणनिधौ भोजक्षमावल्लभे
भूयोऽपि स्पृहया समेत्य शनकैरारोढुमुत्कण्ठिते।
साटोपं प्रतिमा निवार्य चरमा सिंहासने जाग्रती
मुख्यान् विक्रमराजशेखरगुणानाख्याति लोकोत्तरान्॥

श्रीभोजराजे ज्ञात्वाऽपि पुनरागते चरमा सालभाञ्जिका जगाद–"हन्त! कथमियं ते दुराशा! निवृत्तकामोऽपि पुनरागतोऽसि. अद्यापि समाकर्णय श्रीविक्रमार्कगुणान्." भोजः—"अयि सालभञ्जिके! क्षमस्व; भूयोपि कथय तस्यचारित्रं गुणांश्च" सालभञ्जिका.—भो राजन्! श्रूयताम्—

विक्रमार्कस्य सदृशं कमपि न पश्यामि. यः काष्ठमयखड्गेन चतुरकूपारपरिक्षिप्तक्षितितलगतान् नरपतीन् विजित्य निस्सपत्नं राज्यं कृतवान्. यः परेषां शकं निराकृत्यात्मशकं वर्तयामास. समस्तदुर्जननिराकरणं समस्तयाचकलोकदुर्गतिहरणं अवग्रहनिरसनं चैतत् सर्वमपि विक्रमो महीमण्डले निरवशेषं कृतवान्. ततस्तत्समः पुरुषो नास्ति. एवं विधसत्त्वसाहसौदार्यधैर्यादिगुणास्त्वयि विद्यन्ते यदि सिंहासनेऽस्मिन्नुपविश. तच्छ्रुत्वा राजा तूष्णीमवतस्थे.

अत्रान्तरे काचन पुत्रिका चित्रार्पितमिव त्रपाभरादवस्थितं भोजमवादीत्—"भो भोजराज! भवानपि विक्रमार्कप्रतीकाश इत्येव मन्ये, यतो युवां द्वावपि नरनारायणात्मधारिणौ. इदानीं त्वत्तः परः पवित्रचरित्रः सकलकलाप्रवीणः शौर्यौदार्यादिसुगुणभूषणो राजा नास्ति. अतस्तव प्रसादादस्माकं द्वात्रिंशतः पुत्रिकाणां पापपरिहारो जातः. शापाद्विमुक्ताः स्मः." तदा भोजः—"कथं वः शापो जातः? तन्मूलं कथयत" पुत्रिका अकथयन् भो राजन्! श्रूयताम्.

वयं द्वात्रिंशत् सुराङ्गनाः, पार्वत्या वयस्याः, तस्याः परमप्रेमास्पदीभूताः. एता वयमेकदा कुत्रापि रजतशिलातले समुपविष्टाः किमपि सल्लपन्त्यः सुखमास्म. तदा परमेश्वरः सानन्दमस्मासु रागरमणीयां दृष्टिं न्यवेशयत्. तत्रान्तरे तं दृष्ट्वा देवी पार्वती सकोपाऽस्मानेवमशपत्—"भवत्यो निर्जीवाः पुत्रिका भूत्वा वासवसिंहासने तिष्ठन्तु" इति. ततोऽस्माभिः प्रणिपत्य शापावसानं याचिता देवी कृपारसार्द्रान्तःकरणाऽस्मानवदत्—"कलियुगे विक्रमादित्यस्तत्सिंहासनमिद्रलोकाद्भूमिं नेष्यति. तदा तस्मिन्नुपविष्टः स राजचूडामणिर्बहूनि वर्षाणि राज्यं परिपालयिष्यति. तस्मिन् परलोकगते कस्मिंश्चित् पवित्रे क्षेत्रे तदासनं सचिवा निवेशयिष्यन्ति. ततः कतिपयैर्दिवसैस्तद्भोजराजहस्तगतं भविष्यति. ततस्तन्नगरं नीत्वा प्रतिष्ठाप्य तदारोढुं यदा भोजभूपालः समायास्यति, भवतीभिः सह सल्लापं करिष्यति, तदा विक्रमार्कचरित्रं भोजराजाय कथयत. यूयं शापाद्विमोक्ष्यध्वे." इति.

इति निजवृत्तान्तमुक्त्वा पुनरपि भोजमवदन्—"भो राजन्! वयं प्रसन्नाः स्मः. वरं वृणीष्व." तदा भोजः—"मम किं नामापेक्षणीयम्? संपूर्णकामोऽस्मि. तथाऽपि परोपकारार्थं किमपि मया प्रार्थ्यते. ये मर्त्या एतच्चरित्रं शृण्वन्ति लिखन्ति वा तेषां प्रौढप्रतापकीर्तिधैर्यौदार्यादिगुणाः प्रवर्धन्ताम्. एतच्चरित्रमाकल्पमविच्छिन्नं महीमण्डले वर्तताम्. श्रोतॄणां भूतप्रेतपिशाचशाकिनीडाकिनीमारीयक्षराक्षसादिभ्यो भयं मनागपि मा भूत्. व्याघ्रभल्लूकप्रमुखशारारुनिकरादपि भीतिर्मा जायताम्." इति प्रार्थिताः सालभञ्जिका यथाभिलषितमस्त्विति राज्ञे वरं दत्त्वा सर्वा अपि परिगृहीतसुरसुन्दरीविग्रहा दिवमुत्पेतुः.

ततो भोजराजस्तत्सिंहासनं विचित्रहाटकानर्घनवमणिखचितप्रासादशिखरे संस्थाप्य तदुपरि परमेश्वरं निधाय देवं सिंहासनं च प्रतिदिनमर्चयन् सुखेन महीं सुचिरं शशास.

पञ्चतन्त्रम्.

कथा १.

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान् ।
अतिलौल्याद्बकः कश्चिन्मृतः कर्कटकग्रहात् ॥

अस्ति कस्मिंश्चित्प्रदेशे नानाजलचरसनाथं सरः । तत्रच-कृताश्रयो बक एको वृद्धभावमुपागतो मत्स्यान्व्यापादयितुमसमर्थः । ततश्च क्षुत्क्षामकण्ठः सरस्तीर उपविष्टो मुक्ताफलसदृशैरश्रुप्रवाहैर्धरातलमभिषिञ्चन्नरोद । एकः कुलीरको नानाजलचरसमेतः समेत्य तस्य दुःखेन दुःखितः सादरमिदमूचे— "माम ! किमद्य त्वयाऽऽहारवृत्तिर्नानुष्ठीयते । केवलमश्रुपूर्णनेत्राभ्यां सनिःश्वासेन स्थीयते" । स आह—"वत्स ! सत्यमुपलक्षितं भवता । मया हि मत्स्यादनं प्रति परमवैराग्यतया सांप्रतं प्रायोपवेशनं कृतं तेनाहं समीपगतानपि मत्स्यान्न भक्षयामि" । कुलीरकस्तच्छ्रुत्वा प्राह—"किं तद्वैराग्यकारणम्" । स प्राह— "वत्स ! अहमस्मिन्सरसि जातो वृद्धिं गतश्च । तन्मयैतच्छ्रुतं यद्द्वादशवार्षिक्यनावृष्टिः संपद्यते कुलीरक आह—"कस्मात्तच्छ्रुतम्" । बक आह—"दैवज्ञमुखात् । एतत्सरः स्वल्पतोयं वर्तते । शीघ्रं शोषं यास्यति । अस्मिन्शुष्के यैः सहाहं वृद्धिं गतः सदैव क्रीडितश्चैते सर्वे तोयाभावान्नाशं यास्यन्ति । तत्तेषां वियोगं द्रष्टुमहमसमर्थः । तेनैतत्प्रायोपवेशनं कृतम् । सांप्रतं सर्वेषां स्वल्पजलाशयानां जलचरा गुरुजलाशयेषु स्वस्वजनै-

नीयन्ते केचिच्च मकरगोधाशिशुमारजलहस्तिप्रभृतयः स्वयमेव गच्छन्ति। अत्र पुनः सरसि ये जलचरास्ते निश्चिन्ताः सन्ति तेनाहं विशेषाद्रोदिमि यद्बीजशेषमात्रमप्यत्र नोद्धरिष्यति"। ततः स तदाकर्ण्यान्येषामपि जलचराणां तत्तस्य वचनं निवेदयामास। अथ ते सर्वे भयत्रस्तमनसो मत्स्यकच्छपप्रभृतयस्तमभ्युपेत्य पप्रच्छुः—"माम! अस्ति कश्चिदुपायो येनास्माकं रक्षा भवति"। बक आह—"अस्त्यस्य जलाशयस्य नातिदूरे प्रभूतजलसनाथं सरः पद्मिनीखण्डमण्डितं यच्चतुर्विंशत्याऽपि वर्षाणामवृष्ट्या न शोषमेति। तद्यदि मम पृष्ठं कश्चिदारोहति तदहं तं तत्र नयामि"। अथ ते तत्र विश्वासमापन्ना "हे तात मातुल भ्रातरि"ति ब्रुवाणा अहं पूर्वमहंपूर्वमिति समन्तात्परितस्थुः। सोऽपि दुष्टाशयः क्रमेण तान्पृष्ठमारोप्य जलाशयस्य नातिदूरे शिलां समासाद्य तस्यामाक्षिप्य स्वेच्छया भक्षयित्वा भूयोऽपि जलाशयं समासाद्य जलचराणां मिथ्यावार्तासंदेशकैर्मनांसि रञ्जयन्नित्यामिवाहारवृत्तिमकरोत्। अन्यस्मिन्दिने स कुलीरकेणोक्तः—"माम! मया सह ते प्रथमः स्नेहसंभाषः संजातः। तत्किं मां परित्यज्यान्यान्नयसि। तस्मादद्य मे प्राणत्राणं कुरु"। तदाकर्ण्य सोऽपि दुष्टाशयश्चिन्तितवान्। निर्विण्णोऽहं मत्स्यमांसादनेन। तदद्यैतं कुलीरकं व्यञ्जनस्थाने करोमि। इति विचिन्त्य तं पृष्ठे समारोप्य तां वध्यशिलामुद्दिश्य प्रस्थितः। कुलीरकोऽपि दूरादेवास्थिपर्वतं शिलाश्रयमवलोक्य मत्स्यास्थीनि परिज्ञाय तमपृच्छत्—"माम! कियद्दूरे स जलाशयः मदीयभारेणातिश्रान्तस्त्वं तत्कथय"। सोऽपि मन्दधीर्जलचरोऽयमिति मत्वा स्थले न प्रभवतीति सस्मितमिदमाह—"कुलीरक! कुतोन्यो जलाशयः। मम प्राणयात्रेयम्। तस्मात्स्मर्यतामात्मनोऽभीष्टदेवता। त्वामप्यस्यां निक्षिप्य भक्षयि-

ष्यामि। इत्युक्तवति तस्मिन् स्ववदनदंशद्वयेन मृणालनालधवलायां मृदुग्रीवायां गृहीतो मृतश्च। अथ स तां बकग्रीवां समादाय शनैः शनैस्तज्जलाशयमाससाद। ततः सर्वैरेव जलचरैः पृष्टः। "भोः कुलीरक! किंनिवृत्तस्त्वम्। स मातुलोऽपि नायतः। तत्किं चिरयसि। वयं सर्वे सोत्सुकाः कृतक्षणास्तिष्ठामः"। एवं तैरभिहिते कुलीरकोऽपि विहस्योवाच—"मूर्खाः सर्वे जलचरास्तेन मिथ्यावादिना वञ्चयित्वा नातिदूरे शिलातले प्रक्षिप्य भक्षिताः। तन्मयाऽऽयुःशेषतया तस्य विश्वासघातकस्याभिप्रायं ज्ञात्वा ग्रीवेयमानीता। तदलं संभ्रमेण। अधुना सर्वजलचराणां क्षेमं भविष्यति"। इति॥

कथा २.

यस्य बुद्धिर्बलं तस्य निर्बुद्धेस्तु कुतो बलम्।
वने सिंहो मदोन्मत्तः शशकेन निपातितः॥

कस्मिंश्चिद्वने भासुरको नाम सिंहः प्रतिवसति स्म। अथासौ वीर्यातिरेकान्नित्यमेव अनेकान्मृगशशकादीन्व्यापादयन्नोपरराम। अथान्येद्युस्तद्वनजाः सर्वे सारङ्गवराहमहिषशशकादयो मिलित्वा तमभ्युपेत्य प्रोचुः। "स्वामिन्! किमनेन सकलमृगवधेन नित्यमेव यतस्तवैकेनापि मृगेण तृप्तिर्भवति। तत्क्रियतामस्माभिः सह समयधर्मः। अद्यप्रभृति तवात्रोपविष्टस्य जातिक्रमेण प्रतिदिनमेको मृगो भक्षार्थं समेष्यति। एवं कृते तव तावत्प्राणयात्रा क्लेशं विनाऽपि भविष्यत्यस्माकं च पुनः सर्वोच्छेदनं न स्यात्। तदेष राजधर्मोऽनुष्ठीयताम्। उक्तं च—

शनैः शनैश्च यो राज्यमुपभुङ्क्ते यथाबलम् ।
रसायनमिव प्राज्ञः स पुष्टिं परमां व्रजेत् ॥
विधिना मन्त्रयुक्तेन रूक्षाऽपि मथिताऽपि च ।
प्रयच्छति फलं भूमिररणीव हुताशनम् ॥
प्रजानां पालनं शस्यं स्वर्गकोशस्य वर्धनम् ।
पीडनं धर्मनाशाय पापायायशसे स्थितम् ॥
गोपालेन प्रजाधेनोर्वित्तदुग्धं शनैः शनैः ।
पालनात्पोषणाद्ग्राह्यं न्याय्यां वृत्तिं समाचरेत् ॥
अजामिव प्रजां मोहाद्यो हन्यात्पृथिवीपतिः
तस्यैका जायते तृप्तिर्न द्वितीया कथंचन ॥
फलार्थी नृपतिर्लोकान्पालयेद्यत्नमास्थितः ।
दानमानादितोयेन मालाकारोऽङ्कुरानिव ॥
नृपदीपो धनस्नेहं प्रजाभ्यः संहरन्नपि ।
अन्तरस्थैर्गुणैः शुभ्रैर्लक्ष्यते नैव केनचित् ॥
यथा गौर्दुह्यते काले पाल्यते च तथा प्रजाः ।
सिच्यते चीयते चैव लता पुष्पफलप्रदा ॥
यथा बीजाङ्कुरः सूक्ष्मः प्रयत्नेनाभिरक्षितः ।
फलप्रदो भवेत्काले तद्वल्लोकः सुरक्षितः ॥
हिरण्यधान्यरत्नानि यानानि विविधानि च ।
तथाऽन्यदपि यत्किंचित्प्रजाभ्यः स्यान्महीपतेः ॥
लोकानुग्रहकर्तारः प्रवर्धन्ते नरेश्वराः ।
लोकानां संक्षयाच्चैव क्षयं यान्ति न संशयः ॥"

अथ तेषां तदाकर्ण्य भासुरक आह—"अहो सत्यमभिहितं भवद्भिः परं यदि ममाप्युपविष्टस्यात्र नित्यमेव नैकः श्वापदः समागमिष्यति तन्नूनं सर्वानपि भक्षयिष्यामि"। अथ ते

तथैव प्रतिज्ञाय निर्वृतिभाजस्तत्रैव वने निर्भयाः पर्यटन्ति। एकश्च प्रतिदिनं क्रमेण याति। वृद्धो वा वैराग्ययुक्तो वा शोकग्रस्तो वा पुत्रकलत्रनाशभीतो वा तेषां मध्यात्तस्याहारार्थं मध्याह्नसमय उपातिष्ठते। अथ कदाचिज्जातिक्रमाच्छशकस्य वारः समायातः। स समस्तमृगैः प्रेरितोऽनिच्छन्नपि मन्दं मन्दं गत्वा तस्य वधोपायं चिन्तयन्वेलातिक्रमं कृत्वा व्याकुलितहृदयो यावद्गच्छति तावन्मार्गे गच्छता कूपः संदृष्टः। यावत्कूपोपरि याति तावत्कूपमध्य आत्मनः प्रतिबिम्बं ददर्श। तेन हृदये चिन्तितं यद्भव्य उपायोऽस्ति। अहं भासुरकं प्रकोप्य स्वबुद्ध्याऽस्मिन्कूपे पातयिष्यामि। अथसौ दिनशेषे भासुरकसमीपं प्राप्तः। सिंहोऽपि वेलातिक्रमेण क्षुत्क्षामकण्ठः कोपाविष्टः सृक्कणी परिलेलिहद्व्यचिन्तयत्। अहो प्रातराहाराय निःसत्त्वं वनं मया कर्तव्यम्। एवं चिन्तयतस्तस्य शशको मन्दं मन्दं गत्वा प्रणम्य तस्याग्रे स्थितः। अथ तं प्रज्वलितात्मा भासुरको भर्त्सयन्नाह—"रे शशकाधम! एकं तावत्त्वं लघुः प्राप्तोऽपरं वेलातिक्रमेण तदस्मादपराधात्त्वां निपात्य प्रातः सकलान्यपि मृगकुलान्युच्छेदयिष्यामि"। अथ शशकः सविनयं प्रोवाच—"स्वामिन्नापराधो मम। न च सत्वानम्। तच्छ्रूयतां कारणम्" सिंह आह—"सत्वरं निवेदय यावद्दंष्ट्रान्तर्गतो न भवसी"ति। शशक आह—"समस्तमृगैरद्य स्वामिञ्जातिक्रमेण मम लघुतरस्य प्रस्तावं विज्ञाय ततोऽहं पञ्चशशकैः समं प्रेषितः। ततश्चाहमागच्छन्नन्तराले महता केनचिदपरेण सिंहेन विवरान्निर्गत्याभिहितः। "रे! क्व प्रस्थिता यूयम्। अभीष्टदेवतां स्मरत"। ततो मयाऽभिहितम्। "वयं स्वमिनो भासुरकस्य सिंहस्य सकाश आहारार्थं समयधर्मेण गच्छामः"। ततस्तेनाभिहितम्। "यद्येवं तर्हि मदीयमेतद्वनं मया सह समय-

धर्मेण सर्वैः श्वापदैर्वर्तितव्यम्। चौररूपी स भासुरकः। अथ यदि सोऽत्र राजा ततो विश्वासस्थाने चतुरः शशकानत्र धृत्वा तमाहूय द्रुततरमागच्छ येन द्वयोर्मध्याद्यः कश्चित्पराक्रमेण राजा भविष्यति स सर्वानेतान्भक्षयिष्यती" ति। अतोऽहं तेनादिष्टः स्वामिसकाशमागतः। एतद्वेलाव्यतिक्रमकारणम्। तदत्र स्वामीप्रमाणम्"। तच्छ्रुत्वा भासुरक आह—"भद्र! यद्येवं तर्हि सत्वरं दर्शय मे तं चोरसिंहं मृगकोपं तस्योपरि क्षिप्त्वा स्वस्थो भवामि। उक्तं च —

भूमिर्मित्रं हिरण्यं च विग्रहस्य फलत्रयम्।
नास्त्येकमपि यद्येषां न तं कुर्यात्कथंचन॥
यत्र न स्यात्फलं भूरि यत्र च स्यात्पराभवः।
न तत्र मतिमान्युद्धं समुत्पाद्य समाचरेत्"॥

शशक आह—"स्वामिन्सत्यमिदम्। स्वभूमिहेतोः परिभवाच्च युध्यन्ते क्षत्रियाः। परं स दुर्गाश्रयः। दुर्गान्निष्क्रम्य वयं तेन विष्कम्भिताः। ततो दुर्गगतो दुःसाध्यो भवति रिपुः। उक्तं च—

न गजानां सहस्रेण न च लक्षेण वाजिनाम्।
यत्कृत्यं सिध्यति राज्ञां दुर्गेणैकेन विग्रहे॥
शतमेकोऽपि संधत्ते प्राकारस्थो धनुर्धरः।
तस्माद्दुर्गं प्रशंसन्ति नीतिशास्त्रविचक्षणाः॥
पुरा गुरोः समादेशाद्धिरण्यकशिपोर्भयात्।
शक्रेण विहितं दुर्गं प्रभावाद्विश्वकर्मणः॥
तेनापि च वरो दत्तो यस्य दुर्गं स भूपतिः।
विजयी स्यात्ततो भूमौ दुर्गाणि स्युः सहस्रशः॥
दंष्ट्राविरहितो नागो मदहीनो यथा गजः।
सर्वेषां जायते वश्यो दुर्गहीनस्तथा नृपः"॥

तच्छ्रुत्वा भासुरक आह—"भद्र! दुर्गस्थमपि दर्शय तं चौरसिंहं येन व्यापादयामि। उक्तं च—

जातमात्रं न यः शत्रुं रोगं च प्रशमं नयेत्।
महाबलोऽपि तेनैव वृद्धिं प्राप्य स हन्यते॥

तथा च—

उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता।
समौ हि शिष्टैराम्नातौ वर्त्स्यन्तावामयः स च॥

अपि च—

उपेक्षितः क्षीणबलोऽपि शत्रुः
प्रमाददोषात्पुरुषैर्मदान्धैः।
साध्योऽपि भूत्वा प्रथमं ततोऽसा-
वसाध्यतां व्याधिरिव प्रयाति॥

तथा च—

आत्मनः शक्तिमुद्वीक्ष्य मानोत्साहं च यो व्रजेत्।
शत्रून् हन्ति स एकोपि क्षत्रियान्भार्गवो यथा"॥

शशक आह—

"अविदित्वाऽऽत्मनः शक्तिं परस्य च समुत्सुकः।
गच्छन्नभिमुखो वह्नौ नाशं याति पतङ्गवत्॥
यो बलात्प्रोन्नतं याति निहंतुं सबलोऽप्यरिम्।
विमदः स निवर्तेत शीर्णदन्तो गजो यथा"॥

भासुरक आह—"यद्यप्येवं तथाऽपि त्वं दर्शय तं चौरसिंहं यथा व्यापादयामि"। शशक आह—"यद्येवं तर्ह्यागच्छतु स्वामी"। एवमुक्त्वाऽग्रे व्यवस्थितः। ततश्च तेनागच्छता यः कूपो दृष्टोऽभूत्तमेव कूपमासाद्य भसुरकमाह—"स्वामिन्कस्ते प्रतापं सोढुं समर्थः। त्वां दृष्ट्वा दूरतोऽपि चोरसिंहः प्रविष्टः स्वं दुर्गम्।

तदागच्छ यथा दर्शयामीति" । भासुरक आह–"दर्शय मे दुर्गम् ।" तदनु दर्शितस्तेन कूपः । ततः सोऽपि मूर्खः सिंहः कूपमध्य आत्मप्रतिबिम्बं जलमध्यगतं दृष्ट्वा सिंहनादं मुमोच । ततः प्रतिशब्देन कूपमध्यात् द्विगुणतरो नादः समुत्थितः । अथ तेन तं शत्रुं मत्वाऽऽत्मानं तस्योपरि प्रक्षिप्य प्राणाः परित्यक्ताः । शशकोऽपि हृष्टमनाः सर्वमृगानानन्द्य तैः सह प्रशस्यमानो यथासुखं तत्र वने निवसति स्म ॥

कथा ३.

न ह्यविज्ञातशीलस्य प्रदातव्यः परिश्रयः ।
मत्कुणस्य च दोषेण हता मन्दविसर्पिणी ॥

अस्ति कस्यचिन्महीपतेर्मनोरमं शयनस्थानम् । तत्र श्वेततरपटयुगलमध्यसंस्थिता मन्दविसर्पिणी यूका प्रतिवसति स्म । सा च तस्य महीपतेः रक्तमास्वादयन्ती सुखेन कालं नयमाना तिष्ठति । अन्येद्युश्च तत्र शयने क्वचिद्भ्राम्यन्नग्निमुखो नाम मत्कुणः समायातः । अथ तं दृष्ट्वा सा विषण्णवदना प्रोवाच–"भो अग्निमुख! कुतस्त्वमत्रानुचितस्थाने समायातः? तद्यावन्न कश्चिद्वेत्ति तावच्छीघ्रं गम्यतामि" ति । स आह–"भगवति! गृहागतस्यासाधोरपि नैतद्युज्यते वक्तुम् । उक्तं च—

एह्यागच्छ समाश्वसासनमिदं कस्माच्चिराद्दृश्यसे
का वार्ता अतिदुर्बलोऽसि कुशलं प्रीतोऽस्मि ते दर्शनात् ।
एवं नीचजनेऽपि युज्यति गृहं प्राप्ते सतां सर्वदा
धर्मोऽयं गृहमेधिनां निगदितः स्मार्तैर्लघुः स्वर्गदः ॥

अपरं मयाऽनेकमानुषाणामनेकविधानि रुधिराण्यास्वादितान्याहारदोषात्कटुतिक्तकषायाम्लरसास्वादानि न च कदाचिन्मधुररक्तं समास्वादितम् । तद्यदि त्वं प्रसादं करोषि तदस्य नृपतेर्विविधव्यञ्जनान्नपानचोष्यलेह्यस्वाद्वाहारवशादस्य शरीरे यन्मिष्टं रक्तं संजातं तदास्वादनेन सौख्यं संपादयामि जिह्वाया इति । उक्तं च—

रङ्कस्य नृपतेर्वाऽपि जिह्वासौख्यं समं स्मृतम् ।
तन्मात्रं च स्मृतं सारं तदर्थं यतते जनः ॥
यद्येव न भवेल्लोके कर्म जिह्वाप्रतुष्टिदम् ।
तन्न भृत्यो भवेत्कश्चित्कस्यचिद्वशगोऽथवा ॥
यदसत्यं वदेन्मर्त्यो यद्वाऽसेव्यं च सेवते ।
यद्गच्छति विदेशं च तत्सर्वमुदरार्थतः ॥

तन्मया गृहागतेन बुभुक्षया पीड्यमानेनापि त्वत्सकाशाद्भोजनं लभ्यम् । तन्न त्वयैकाकिन्याऽस्य भूपतेः रक्तभोजनं कर्तुं युज्यते"। तच्छ्रुत्वा मन्दविसर्पिण्याह— "भो मत्कुण ! अस्य नृपतेर्निद्रावशं गतस्याहं रक्तमास्वादयामि पुनस्त्वमग्निमुखश्चपलश्च । तद्यदि मया सह रक्तपानं करोषि तत्तिष्ठ । अभीष्टतररक्तमास्वादय"। सोऽब्रवीत्—"भगवति ! एवं करिष्यामि । यावत्त्वं नास्वादयसि प्रथमं नृपरक्तं तावन्मम देवगुरुकृतः शपथः स्याद्यदि तदास्वादयामि"। एवं तयोः परस्परं वदतोः स राजा तच्छयनमासाद्य प्रसुप्तः । अथासौ मत्कुणो जिह्वालौल्योत्कृष्टौत्सुक्याज्जाग्रतमपि तं महीपतिमदशत् । अथवा साध्विदमुच्यते—

स्वभावो नोपदेशेन शक्यते कर्तुमन्यथा ।
सुतप्तमपि पानीयं पुनर्गच्छति शीतताम् ॥

यदि स्याच्छीतलो वह्निः शीतांशुर्दहनात्मकः ।
न स्वभावोऽत्र मर्त्यानां शक्यते कर्तुमन्यथा ॥

अथासौ महीपतिः सूच्यग्रविद्ध इव तच्छयनं त्यक्त्वा तत्क्षणादेवोत्थितः। "अहो! ज्ञायतामत्र प्रच्छादनपटे मत्कुणो यूका वा नूनं तिष्ठति येनाहं दष्ट" इति। अथ ये कञ्चुकिनस्तत्र स्थितास्ते सत्वरं प्रच्छादनपटं गृहीत्वा सूक्ष्मदृष्ट्या वीक्षांचक्रुः। अत्रान्तरे स मत्कुणश्चापल्यात्खट्वान्तं प्रविष्टः सा मन्दविसर्पिण्यपि वस्त्रसंध्यन्तर्गता तैर्दृष्टा व्यापादिता च ॥

कथा ४.

त्यक्ताश्चाभ्यन्तरा येन बाह्याश्चाभ्यन्तरीकृताः ।
स एव मृत्युमाप्नोति यथा राजा ककुद्रुमः ॥

अस्ति कस्मिंश्चिद्वनोद्देशे चण्डरवो नाम सृगालः। स कदाचित्क्षुधाऽऽविष्टो जिह्वालौल्यान्नगरमध्ये प्रविष्टः। अथ तं सारमेया विलोक्य सर्वतः शब्दायमानाः परिधाव्य तीव्रदन्तैर्भक्षयितुमारब्धाः। सोऽपि तैर्भक्ष्यमाणः प्राणभयात् प्रत्यासन्नरजकगृहं प्रविष्टः। तत्र नीलीरसपरिपूर्णमहाभाण्डमासीत्। तत्र सारमेयैराक्रान्तो भाण्डमध्ये पतितः। अथ यावन्निष्क्रान्तस्तावन्नीलीवर्णः संजातः। तत्रापरे सारमेयास्तं सृगालमजानन्तो यथाऽभीष्टदिशं जग्मुः। चण्डरवोऽपि दूरतरं प्रदेशमासाद्य काननाभिमुखं प्रतस्थे। न च नीलवर्णेन कदाचिन्निजरङ्गस्त्यज्यते। उक्तं च–

वज्रलेपस्य मूर्खस्य नारीणां कर्कटस्य च ।
एको ग्रहस्तु मीनानां नीलीमद्यपयोर्यथा ॥

अथ तं हरगलगरलतमालसमप्रभमपूर्वं सत्त्वमवलोक्य सर्वे सिंहव्याघ्रद्वीपिवृकप्रभृतयोऽरण्यनिवासिनो भयव्याकुलितचित्ताः

समन्तात्पलायनक्रियां कुर्वन्ति कथयन्ति च । न ज्ञायतेऽस्य कीदृग्विचेष्टितं पौरषं च तद्दूरतरं गच्छामः । उक्तं च—

न यस्य चेष्टितं विद्यान्न कुलं न पराक्रमम् ।
न तस्य विश्वसेत्प्राज्ञो यदीच्छेच्छ्रियमात्मनः ॥

चण्डरवोऽपि भयव्याकुलितान्विज्ञायेदमाह "भो भो श्वापदाः ! किं यूयं मां दृष्ट्वैव संत्रस्ता व्रजथ । तन्न भेतव्यम् । अहं ब्रह्मणाऽद्य स्वयमेव सृष्ट्वाऽभिहितः । यच्छ्वापदानां कश्चिद्राजा नास्ति तत्त्वं मयाऽद्य सर्वश्वापदप्रभुत्वेऽभिषिक्तस्ततो गत्वा तान्सर्वान्परिपालयेति । ततोऽहमत्रागतः । तन्ममछत्रच्छायायां सर्वैरपि श्वापदैर्वर्तितव्यम् । अहं ककुद्रुमो नाम राजा त्रैलोक्येऽपि संजातः" । तच्छ्रुत्वा सिंहव्याघ्रपुरस्सराः श्वापदाः "स्वामिन्प्रभो ! समादिशे" ति वदन्तस्तं परिवव्रुः । अथ तेन सिंहस्यामात्यपदवी प्रदत्ता व्याघ्रस्य शय्यापालकत्वं द्वीपिनस्ताम्बूलाधिकारो वृकस्य द्वारपालकत्वम् । ये चात्मीयाः सृगालास्तैः सहालापमात्रमपि न करोति । सृगालाः सर्वेऽपि निस्सारिताः । एवं राज्यक्रियया वर्तमानस्य सिंहादयो मृगान्व्यापाद्य तत्पुरतः प्रक्षिपन्ति । सोऽपि प्रभुधर्मेण सर्वेषां तान्प्रविभज्य प्रयच्छति । एवं गच्छति काले कदाचिद्दूरदेशे शब्दायमानाः सृगाला आकर्णिताः । तेषां शब्दं श्रुत्वा पुलकिततनुरानन्दाश्रुपूर्णनयनस्तारस्वरेण विरोतुमारब्धः । अथ ते सिंहादयस्तं तारस्वरमाकर्ण्य सृगालोऽयमिति मत्वा लज्जयाऽधोमुखाः क्षणं स्थित्वा प्रोचुः । "भो वाहिता अनेन वयम् । क्षुद्रसृगालोऽयम् । तद्वध्यतामिति" । सोऽपि तदाकर्ण्य पलायितुमिच्छंस्तत्र स्थान एव सिंहादिभिः खण्डशः कृतो मृतश्च ॥

कथा ५.

बहवः पण्डिताः क्षुद्राः सर्वे मायोपजीविनः ।
कुर्युः कृत्यमकृत्यं वा उष्ट्रे काकादयो यथा ॥

अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्य चानुचरा अन्ये द्वीपिवायसगोमायवः सन्ति । अथ कदाचित्तैरितस्ततो भ्रमद्भिः सार्थाद्भ्रष्टः कथनको नामोष्ट्रो दृष्टः । अथ सिंह आह—"अहो अपूर्वमिदं सत्त्वम् । तज्ज्ञायतां किमेतदारण्यकं ग्राम्यं वेति"। तच्छ्रुत्वा वायस आह—"भोः स्वामिन्ग्राम्योऽयमुष्ट्रनामा जीवविशेषस्तव भोज्यः । तद्व्यापाद्यताम्"। सिंह आह—"नाहं गृहमागतं हन्मि । उक्तं च—

गृहं शत्रुमपि प्राप्तं विश्वस्तमकुतोभयम् ।
यो हन्यात्तस्य पापं स्याच्छतब्राह्मणघातजम् ॥

तदभयप्रदानं दत्वा मत्सकाशमानीयतां येनास्यागमनकारणं पृच्छामि"। अथासौ सर्वैरपि विश्वास्याभयप्रदानं दत्वा मदोत्कटसकाशमानीतः प्रणम्योपविष्टश्च । ततस्तस्य पृच्छतस्तेनात्मवृत्तान्तः सार्थभ्रंशसमुद्भवो निवेदितः । ततः सिंहेनोक्तम्—"भोः कथनक ! मा त्वं ग्रामं गत्वा भूयोऽपि भारोद्वहनकष्टभागी भूयाः । तदत्रारण्ये निर्विशङ्को मरकतसदृशानि शष्पाग्राणि भक्षयन्मया सह सदैव वस"। सोऽपि तथेत्युक्त्वा तेषां मध्ये विचरन्नकुतोऽपि भयमिति सुखेनास्ते । तथाऽन्येद्युर्मदोत्कटस्य महागजेनारण्यचारिणा सह युद्धमभवत् । ततस्तस्य दन्तमुसलप्रहारैर्व्यथा संजाता । व्यथितः कथमपि प्राणैर्न वियुक्तः । अथ शरीरासामर्थ्यान्न कुत्रचित्पदमपि चलितुं शक्नोति । ते सर्वे काकादयोऽप्यप्रभुत्वेन क्षुधाऽऽविष्टाः परं दुःखं भेजुः ।

अथ तान्सिंहः प्राह—"भो अन्विष्यतां कुत्रचित्किंचित्सत्त्वं येनाहमेतामपि दशां प्राप्तस्तद्धत्वा युष्मद्भोजनं संपादयामि। अथ ते चत्वारोऽपि भ्रमितुमारब्धा यावन्न किंचित्सत्त्वं पश्यन्ति तावद्वायसशृगालौ परस्परं मन्त्रयतः। शृगाल आह—भोवायस! "किं प्रभूतभ्रान्तेन। अयमस्माकं प्रभोः कथनको विश्वस्तस्तिष्ठति। तदेनं हत्वा प्राणयात्रां कुर्मः"। वायस आह—"युक्तमुक्तं भवता परं स्वामिना तस्याभयप्रदानं दत्तमास्ते न वध्योऽयमिति"। शृगाल आह—"भो वायस! अहं स्वामिनं विज्ञाप्य तथा करिष्ये यथा स्वामी वधं करिष्यति। तत्तिष्ठन्तु भवन्तोऽत्रैव यावदहं गृहं गत्वा प्रभोराज्ञां गृहीत्वा चागच्छामि"। एवमभिधाय सत्वरं सिंहमुपस्थितः। अथ सिंहमासाद्येदमाह—"स्वामिन्समस्तं वनं भ्रान्त्वा वयमागताः। न किंचित्सत्त्वमासादितम् तत्किंकुर्मो वयम्। संप्रति वयं बुभुक्षया पदमपि चलितुं न शक्नुमः। देवोऽपि पथ्याशी वर्तते। तद्यदि देवादेशो भवति तत्कथनकपिशितेनाद्य पथ्यक्रिया क्रियते"। अथ सिंहस्तस्य तद्दारुणं वचनमाकर्ण्य सकोपमिदमाह—"धिक्पापाधम! यद्येवं भूयोऽपि वदसि ततस्त्वां तत्क्षणेन वधिष्यामि। यतो मया तस्याभयं दत्तम्। तत्कथं व्यापादयामि। उक्तं च—

न गोप्रदानं न महीप्रदानं
  न चान्नदानं हि तथा प्रदानम्।
यथा वदन्तीह बुधाः प्रधानं
  सर्वप्रदानेष्वभयप्रदानम्"॥

तच्छ्रुत्वा शृगाल आह—"स्वामिन्यद्यभयप्रदानं दत्त्वा वधः क्रियते तदेष दोषो भवति। पुनर्यदि देवपादानां भक्त्या स आत्मनो जीवितव्यं प्रयच्छति तन्न दोषः। ततो यदि स

स्वयमेवात्मानं वधाय नियोजयति तद्वध्योऽन्यथाऽस्माकं मध्यादेकतमो वध्य इति। यतो देवपादाः पथ्याशिनः क्षुन्निरोधादन्त्यां दशां यास्यन्ति। तत्किमेतैः प्राणैरस्माकं ये स्वाम्यर्थे न यास्यन्ति। अपरं पश्चादप्यस्माभिर्वह्निप्रवेशः कार्यो यदि स्वामिपादानां किंचिदनिष्टं भविष्यति। उक्तं च—

यस्मिन्कुले यः पुरुषः प्रधानः
स सर्वयत्नैः परिरक्षणीयः।
तस्मिन्विनष्टे स्वकुलं विनष्टं
न नाभिभङ्गे ह्यरका वहन्ति"॥

तदाकर्ण्य मदोत्कट आह "यद्येवं तत्कुरुष्व यद्रोचते"। तच्छ्रुत्वा स सत्वरं गत्वा तानाह—"भोः! स्वामिनो महत्यवस्था वर्तते तत्किं पर्यटितेन। तेन विना कोऽत्रास्मान्रक्षयिष्यति। तद्गत्वा तस्य क्षुद्दोषात्परलोकं प्रस्थितस्यात्मशरीरदानं कुर्मो येन स्वामिप्रसादस्यानृणतां गच्छामः। उक्तं च—

आपदं प्राप्नुयात्स्वामी यस्य भृत्यस्य जीवतः।
प्राणेषु विद्यमानेषु स भृत्यो नरकं व्रजेत्"॥

इति श्रुत्वा ते सर्वे बाष्पपूरितदृशो मदोत्कटं प्रणम्योपविष्टाः। तान्दृष्ट्वा मदोत्कट आह। "भोः! प्राप्तं दृष्टं वा किंचित्सत्त्वम्"। अथ तेषां मध्यात्काकः प्रोवाच—"स्वामिन्वयं तावत्सर्वत्र पर्यटिताः परं न किंचित्सत्त्वमासादितं दृष्टं वा। तदद्य मां भक्षयित्वा प्राणान्धारयतु स्वामी येन देवस्याप्यायना भवति मम पुनः स्वर्गप्राप्तिरिति। उक्तं च—

स्वाम्यर्थे यस्त्यजेत्प्राणान्भृत्यो भक्तिसमन्वितः।
स परं पदमाप्नोति जरामरणवर्जितम्"॥

तच्छ्रुत्वा सृगाल आह—"भोः! स्वल्पकायो भवान्। भवद्भक्षणात्स्वामिनस्तावत्प्राणयात्रा न भवत्यपरो दोषश्च तावत्समुत्पद्यते। उक्तं च—

काकमांसं शुनोच्छिष्टं स्वल्पं तदपि दुर्बलम्।
भक्षितेनापि किं तेन तृप्तिर्येन न जायते॥

तद्दर्शिता स्वामिभक्तिर्भवता गतं चानृण्यं भर्तृपिण्डस्य प्राप्तश्चोभयलोके साधुवादः। तदपसराग्रतः। अहं स्वामिनं विज्ञापयामि"। तथाऽनुष्ठिते सृगालः सादरं प्रणम्योपविष्टः। "स्वामिन्मां भक्षयित्वाऽद्य प्राणायात्रां विधाय ममोभयलोकप्राप्तिं कुरु। उक्तं च—

स्वाम्यायत्ताः सदा प्राणा भृत्यानामार्जिता धनैः।
यतस्ततो न दोषोस्ति तेषां ग्रहणसंभवः"॥

अथ तच्छ्रुत्वा द्वीप्याह—"भोः! साधूक्तं भवता पुनः भवानपि स्वल्पकायः स्वजातिश्च नखायुधत्वादभक्ष्य एव। उक्तं च—

नाभक्ष्यं भक्षयेत्प्राज्ञः प्राणैः कण्ठगतैरपि।
विशेषात्तदपि स्तोकं लोकद्वयविनाशकम्॥

तद्दर्शितं त्वयाऽऽत्मनः कौलीन्यम्। अथवा साधु चेदमुच्यते—

एतदर्थं कुलीनानां नृपाः कुर्वन्ति संग्रहम्।
आदिमध्यावसानेषु न ते गच्छन्ति विक्रियाम्॥

तदपसराग्रतो येनाहं स्वामिनं विज्ञापयामि"। तथाऽनुष्ठिते द्वीपी प्रणम्य मदोत्कटमाह "स्वामिन्क्रियतामद्य मम प्राणैः प्राणयात्रा दीयतामक्षयो वासः स्वर्गे मम विस्तार्यतां क्षितितले प्रभूतं यश इति तन्नात्र विस्मयः कार्यः। उक्तं च—

मृतानां स्वामिनः कार्ये भृत्यानामनुवर्तिनाम् ।
भवेत्स्वर्गेऽक्षयो वासः कीर्तिश्च धरणीतले" ॥

तच्छ्रुत्वा कथनकश्चिन्तयामास । एतैस्तावत्सर्वैरपि शोभावाक्यान्युक्तानि न चैकोऽपि स्वामिना विनाशितः । तदहमपि प्राप्तकालं वक्ष्यामि चित्रकं येन मद्वचनमेते त्रयोऽपि समर्थयन्ति । इति निश्चित्य प्रोवाच—"भोः! सत्यमुक्तं भवता परं भवानपि नखायुधः । तत्कथं भवन्तं स्वामी भक्षयति । उक्तं च—

मनसाऽपि स्वजात्यानां योऽनिष्टानि प्रचिन्तयेत् ।
भवन्ति तस्य तान्येव इह लोके परत्र च ॥

तदपसराग्रतो येनाहं स्वामिनं विज्ञापयामि" । तथाऽनुष्ठिते कथनकोऽग्रे स्थित्वा प्रणम्योवाच—"स्वामिन्! एतेऽभक्ष्यास्तव तन्मम प्राणैः प्राणयात्रा विधीयतां येन ममोभयलोकप्राप्तिर्भवति । उक्तं च—

न यज्वानोऽपि गच्छन्ति तां गतिं नैव योगिनः ।
यां यान्ति प्रोज्झितप्राणाः स्वाम्यर्थे सेवकोत्तमाः ॥"

एवमभिहिते ताभ्यां सृगालचित्रकाभ्यां विदारितोभयकुक्षिः कथनकः प्राणानत्याक्षीत् । ततश्च तैः क्षुद्रपण्डितैः सर्वैर्भक्षितः ।

कथा ६.

धर्मबुद्धिः कुबुद्धिश्च द्वावेतौ विदितौ मम ।
पुत्रेण व्यर्थपाण्डित्यात्पिता धूमेन घातितः ॥

कस्मिंश्चिद्देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे प्रतिवसतः । अथ कदाचित्पापबुद्धिना चिन्तितं यदहं तावन्मूर्खो दारिद्र्यो-

पेतश्च । तदेनं धर्मबुद्धिमादाय देशान्तरं गत्वाऽस्याश्रयेणार्थोपार्जनां कृत्वैनमपि वञ्चयित्वा सुखी भवामि । अथान्यस्मिन्नहनि पापबुद्धिर्धर्मबुद्धिं प्राह—"भो मित्र! वार्धकभावे किमात्मनश्चेष्टितं स्मरिष्यसि । देशान्तरमदृष्ट्वा कां शिष्टजनवार्तां कथयिष्यसि । उक्तं च—

देशान्तरेषु बहुविधभाषावेषादि येन न ज्ञातम् ।
भ्रमता धरणीपीठे तस्य फलं जन्मनो व्यर्थम ॥

तथा च—

विद्यां वित्तं शिल्पं तावन्नाप्नोति मानवः सम्यक् ।
यावद्व्रजति न भूमौ देशाद्देशान्तरं हृष्टः ॥

अथ तद्वचनमाकर्ण्य प्रहृष्टमनास्तेनैव सह गुरुजनानुज्ञातः शुभेऽहनि देशान्तरं प्रस्थितः । तत्र च धर्मबुद्धिप्रभावेण भ्रमता पापबुद्धिना प्रभूततरं वित्तमासादितम् । ततश्च तौ द्वावपि प्रभूतोपार्जितवित्तौ प्रहृष्टौ स्वगृहं प्रत्यौत्सुक्येन प्रस्थितौ । उक्तं च—

प्राप्तविद्यार्थशिल्पानां देशान्तरनिवासिनाम् ।
क्रोशमात्रोऽपि भूभागः शतयोजनवद्भवेत् ॥

अथ स्वस्थानसमीपवर्तिना पापबुद्धिना धर्मबुद्धिरभिहितः । "भद्र! न सर्वमेतद्धनं गृहं प्रति नेतुं युज्यते यतः कुटुम्बिनो बान्धवाश्च प्रार्थयिष्यन्ति । तदत्रैव वनगहने क्वापि भूमौ निक्षिप्य किंचिन्मात्रमादाय गृहं प्रविशावो भूयोऽपि प्रयोजने संजाते तन्मात्रं समेत्यास्मात्स्थानान्नेष्यावः । उक्तं च—

न वित्तं दर्शयेत्प्राज्ञः कस्यचित्स्वल्पमप्यहो ।
मुनेरपि यतस्तस्य दर्शनाच्चलते मनः ॥

तथा च—

यथाऽऽमिषं जले मत्स्यैर्भक्ष्यते श्वापदैर्भुवि ।
आकाशे पक्षिभिश्चैव तथा सर्वत्र वित्तवान् " ॥

तदाकर्ण्य धर्मबुद्धिराह—" भद्र । एवं क्रियताम् " । तथानुष्ठिते द्वावपि तौ स्वगृहं गत्वा सुखेन स्थितवन्तौ । अन्यदा च पापबुद्धिर्निशीथे तत्रागत्य सर्वं वित्तमादाय गर्तं पूरयित्वा स्वभवनं जगाम । अथान्येद्युर्धर्मबुद्धिं समेत्य प्रोवाच—" सखे ! बहुकुटुम्बा वयं वित्ताभावात्सीदामः । तद्गत्वा तत्स्थानात्किंचिद्वित्तमानयावः " । सोऽब्रवीत्—" भद्र ! एवं क्रियतामिति " । अथ द्वावपि गत्वा यावत्स्थानं खनतस्तावद्रिक्तभाण्डं दृष्टवन्तौ । अत्रान्तरे पापबुद्धिःशिरस्ताडयन्प्रोवाच । " भो धर्मबुद्धे ! त्वया हृतमेतद्धनं नान्येन यतो भूयोऽपि गर्तापूरणं कृतम् । तत्प्रयच्छ मे तस्यार्धम् । अथवाऽहं राजकुले निवेदयिष्यामि " । स आह—" भो दुरात्मन्मा मैवं वद । धर्मबुद्धिः खल्वहम् । नैतच्चौरकर्म करोमि । उक्तं च—

मातृवत्परदारांश्च परद्रव्याणि लोष्ठवत् ।
आत्मवत्सर्वभूतानि यः पश्यति स पश्यति " ॥

एवं तौ द्वावपि विवदमानौ धर्माधिकारिणं गतवन्तौ प्रोचतुः परस्परं दूषयन्तौ । अथ धर्माधिकरणाधिष्ठितपुरुषैः दिव्यार्थे यावन्नियोजितौ तावत्पापबुद्धिराह—"अहो न सम्यग्दृष्टो न्यायः । उक्तं च—

विवादेऽन्विष्यते पत्रं पत्राभावे तु साक्षिणः ।
साक्ष्यभावत्ततो दिव्यं प्रवदन्ति मनीषिणः ॥

अत्र विषये मम वृक्षदेवताः साक्षिभूताः सन्ति । तत्ता एवावयोरेकतरं चौरं साधुं वा करिष्यन्ति " । अथ तैः सर्वैरभिहितम् । " भो ! युक्तमुक्तं भवता । उक्तं च—

अन्त्यजोऽपि यदा साक्षी विवादे संप्रजायते ।
न तत्र विद्यते दिव्यं किं पुनर्यत्र देवताः ॥

तदस्माकमप्यत्र विषये महत्कौतूहलमस्ति । तत्प्रत्यूषसमये द्वाभ्यामस्माभिः सह तत्र वनोद्देशे गन्तव्यामिति"। अथ पापबुद्धिः स्वगृहं गत्वा स्वजनकमुवाच—"तात ! प्रभूतोऽयं मयाऽर्थो धर्मबुद्धेश्चोरितः। स च तव वचनेन परिणतिं यास्यति । अन्यथा मम प्राणैः सह यास्यति"। स आह—"वत्स! द्रुतं वद येन प्रोच्य तद्द्रव्यं स्थिरतां नयामि"। पापबुद्धिराह—"तात! अस्ति तत्प्रदेशे महाशमी। तस्यां महत्कोटरमस्ति। तत्र त्वं सांप्रतमेव प्रविश ततः प्रभातेऽहं यदा सत्यश्रावणं करोमि तदा त्वया वाच्यं यद्धर्मबुद्धिश्चौर इति" तथाऽनुष्ठिते प्रत्यूषे पापबुद्धिः स्नात्वा धर्मबुद्धिपुरस्सरो राजपुरुषैः सह तां शमीमभ्येत्य तारस्वरेण प्रोवाच—

"आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मो हि जानाति नरस्य वृत्तम् ॥

तत्कथयत वनदेवताः! आवयोर्यश्चौर" इति। अथ पापबुद्धिपिता शमीकोटरस्थः प्रोवाच—"भो! धर्मबुद्धिना हृतमेतद्धनम्"। तदाकर्ण्य सर्वे राजपुरुषा विस्मयोत्फुल्ललोचना यावद्धर्मबुद्धेर्वित्तहरणोचितं निग्रहं शास्त्रदृष्ट्याऽवलोकयन्ति तावद्धर्मबुद्धिना तच्छमीकोटरं वह्निभोज्यद्रव्यैः परिवार्य वह्निना संदीपितम्। अथ ज्वलति तस्मिन् शमीकोटरेऽर्धदग्धशरीरः स्फुटितेक्षणः करुणं परिदेवयन्पापबुद्धिपिता निश्चक्राम। ततस्तैः सर्वैः पृष्टः सर्वं पापबुद्धिचेष्टितं निवेदयामास ॥
